# Shri AnantArya Ashtakam

# શ્રીમદનન્તાર્યાષ્ટકમ્

## Document Information

Text title : Anantarya Ashtakam

File name : anantAryAShTakam.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : nArAyaNArya

Transliterated by : TCA Venkatesan vtca at yahoo.com

Proofread by : TCA Venkatesan vtca at yahoo.com

Acknowledge-Permission: <a href="http://www.acharya.org">Srivaishnava Sampradhayam</a>

Latest update : December 4, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીમદનન્તાર્યાષ્ટકમ્

શ્રીમદનન્તાર્યકુમાર રામાનુજાર્યપુત્ર નારાયણાર્ય પ્રણીતા
॥ શ્રીમદનન્તાર્ય વિષયા અષ્ટશ્લોકી ॥

વન્દેઽનન્તગુરૂત્તંસ વંશમુક્તાફલાત્મનઃ ।
રામાનુજાર્યસ્ય સુતં શ્રીનારાયણદેશિકમ્ ॥

શ્રીરામાનુજવરજે મુનૌ શઠરિપોર્ગાથા વિશેષાર્થદે
શિષ્યાન્ પ્રેક્ષ્ય ભવત્સુ વેઙ્કટપતેઃકઃકિઙ્કરસ્સ્યા દિતિ ।
પ્રશ્નં કુર્વતિ તેષુ મૌનિષુચ યો બદ્ધાઞ્જલિઃ પ્રાર્થયન્
પ્રાપ શ્રીનિધિકિઙ્કરત્વમનઘં તં શેષ સૂરિં ભજે ॥ ૧॥

શ્રીરઙ્ગાદ્વૃષભાચલં પ્રચલિતેશ્વાર્યેષુ ભોજ્યાર્થિષુ
શ્રાન્તેષ્વધ્વનિ વેઙ્કટાચલપતિઃ ચિત્રાન્ન પાત્રં વહન્ ।
પૃષ્ટસ્તૈરિતિ કો ભવાન્ કુત ઇદં યઃશિષ્યભાવં વદન્
પથ્યેયદ્વિષયે બભાણ ફણિરાટ્ સૂર્યુત્તમં તં ભજે ॥ ૨॥

સ્નાતું સ્વામિ સરોવરં પ્રતિ ચલન્ શેષાર્યવર્યઃપથિ
વ્યાઘ્રે ચેલ દશાઞ્ચલ સ્પૃશિ તતઃ શિષ્યેષુમુક્ત્યર્થિષુ ।
ભૂયાદેવમિતિબ્રુવન્ પુનરપિ સ્નાત્વૈત્ય પશ્યન્ મૃતં
દીપ્તં વેઙ્કટનાયકાઙ્ઘ્રિકમલે હૃષ્ટોઽસ્તુનઃ શ્રેયસે ॥ ૩॥

તિષ્ઠન્ શેષગુરો મમિવહિગુરૌ મુક્તિં પરૌદુર્લભાં
વ્યાઘ્રાદેશ્ચ દદાતિ ચેદપિ ભવાન્ કિંમેઽત્ર યાસ્યામ્યહમ્ ।
ઇત્યુક્તશ્ચ વૃષાદ્રિ રાજપતિનાઽનન્તાર્ય ચૂડામણિઃ
મત્તઃ શ્રૈષ્ઠ્યમિદં તવાત્ર ન પરં સપ્તાહ ઇત્યબ્રવીત્ ॥ ૪॥

યાસ્યન્ કેરલસંજ્ઞકં જનપદં પાથેય બન્ધં પથિ
સ્નાત્વાઽઽરાધ્ય જગદ્ગુરું તદનુ યો ભોક્તું વિવિચ્યાદરાત્ ।
ધૃષ્ટ્વા તત્રપિપીલિકા ઇતિ મયા નાન્યત્ર નેયા ઇમાઃ

શેષાદ્રિં પુનરેત્ય તાશ્વમુમુશે નન્તાસ્મ્યનન્તં ગુરુમ્ ॥ ૫॥

શ્રીમચ્ચમ્પક જાતિ કુન્દકુટજા ધ્યુત્ફુલ્લ પુષ્પાકરે
યસ્યોદ્યાનવરે પરસ્સ ભગવાન્ શ્રીવેઙ્કટેશો નિશિ ।
ત્યક્ત્વાનન્દવિમાનમન્વહમહો લક્ષ્મ્યાસહારંસ્ત હા
તસ્મૈ શેષગુરૂત્તમાય સતતં કુર્યાં નમસ્સન્તતિમ્ ॥ ૬॥

શ્રીમદ્વેઙ્કટનાયક પ્રિયતમા વાત્સલ્ય સીમા રમા
નિશ્યુદ્યાન લતાન્ત કેલિસમયે ગ્રસ્તાતિ ભીતેવ સા ।
સપ્રેમસ્મિતમાહ મુગ્ધમધુરં ભોસ્તાત તાતેતિ યં
તં વન્દે ગુરુમૌલિ શેખરમહં શેષાર્યવર્યં સદા ॥ ૭॥

કન્યાકક્ષકરાત્ત પુષ્પપિટકં કાલ્યાગતં શ્રીનિધિઃ
મહ્યં દેહિ તવાત્મજામિતિ ભૃશં યં પ્રાર્થ્યલેભે નતઃ ।
કન્યાશુલ્કમિતીવ સસ્પૃહતરં પ્રોદ્ધૃત્ય કણ્ટાન્નિજાત્
માલાં યસ્ય ગલેઽર્પયન્ તમનિશં શેષાર્યવર્યં શ્રયે ॥ ૮॥

શ્રીમદ્રામાનુજાચાર્ય પુત્ર નારાયણોદિતમ્ ।
કલયન્તુ સદા સન્તોઽનન્તાર્યાષ્ટકમાદરાત્ ॥

॥ શ્રીમદનન્તાર્ય અષ્ટશ્લોકી સમ્પૂર્ણમ્ ॥

Enoded and proofread by TCA Venkatesan vtca at yahoo.com
acharya.org

---

*Shri AnantArya Ashtakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*